क्र. नं. ४३ बं. नं. १० पु. नं. :

अंक १७

1.8

संवत्सरोत्सवकल्पलतापत्र १५

॥उत्सवकल्पलताश्रीबडेदेवकीनंदनजीकृतपत्र १५

श्रीगोपीजनवल्लभो जयति ॥ श्रीगोकुलेन्द्रपादाब्जपरागपरिपूर्त्तये ॥ कायवाङ्मनसा
नित्यं वंदे वल्लभनंदनं ॥१॥ श्रीविठ्ठलेन्द्रपादाब्जपरागासक्तचेतसा ॥ पुष्टिमार्गप्रवृत्तानां
भक्तानां बोधसिद्धये ॥२॥ संवत्सरोत्सवदलैर्युक्ता कल्पलता मया ॥ क्रीयते तेन संतुष्टाः
सदा संतु मयीश्वराः ॥३॥ भगवज्जन्ममूलत्वात्सर्वं भाद्रपदोत्सवः ॥ निर्णीयंते विचारेण
सप्रमाणं यथामति ॥४॥ मासि भाद्रपदेऽष्टम्यां जन्माष्टम्युच्यते बुधैः ॥ तस्यामेव हि शुद्धा
यास्तूत्सवः लक्ष्मसेवकैः ॥५॥ कर्त्तव्यः सर्वभावेन मंगलादियुतः सदा ॥ तदंगत्वेनोपवा
सः कार्यो ह्यातंदष्टधये ॥६॥ तत्र शुद्धास्वरूपं तु सप्तमीवेधवर्जितं ॥ यदा त्वेवं सप्तमी १
स्यादष्टमी चेत्त्वयं गता ॥७॥ तदा शुद्धा नवम्येवोपोष्या स्वाचार्यवाक्यतः ॥ पुरुषोत्तमप्रा
कट्यं यतो नंदस्य हेमतं ॥८॥ तत्रोत्सवो नवम्यां वै प्राकट्यं च तथैव हि ॥ श्रीमदाचार्यचरणै

रतएवनिरूपितं॥९॥अनेनेत्यादिनवमीह्युपौष्येसंततःस्फुटं॥एतदेवासंधायप्रोक्तंश्रीविठ्ठ
लेश्वरैः॥१०॥यदीत्यारसस्यसर्वोक्तिरीतिरेकेतिसंस्फुटं॥रीतिरित्युक्तितोपूर्वविक्षामान्याक
दापिन॥११॥अन्यथासर्वविद्वेतिस्पष्टारीतिःकथंलता॥अन्यथाश्रीमदाचार्योक्तौविरोधो
नवेस्फुटं॥१२॥तद्विरोधेनकथनंनश्रीविठ्ठलसंततं॥तस्मादुक्तस्वरूपेणैवोत्सवोपोष
णमतं॥१३॥तत्रचप्रातरारभ्यतस्यमन्त्रनिरूप्यते॥प्रातःस्नात्वाचविधिनाप्रबोध्यव्रज
वल्लभं॥१४॥मंगलारात्रिकंकृत्वामंचकेस्थापयेच्छुभं॥पीतांबरपरीधानंकारयित्वाव्र
जाधिपे॥१५॥कुंकुमाक्षतसंयुक्तंतांबूलद्वयसंयुतं॥धृत्वापात्रेकरेकुर्यात्तिलकंगोकुला
धिपे॥१६॥भेरीमृदंगघोषैश्चगीतवादित्रमंगलैः॥पंचामृतेनसप्रेमस्नपनंकारयेद्वि
तोः॥१७॥पुनःसुगंधतैलेनकुंकुमेनसुगंधिना॥आनंदितःकारयेद्वैह्यभ्यंगंचोष्णवारि

णा॥१८॥ ततः प्रोक्षनमंगानां कुर्याद्वस्त्रेण नूतनैः॥ ततो महार्हालंकारैर्वस्त्रैः कुंकुमरंजितैः॥
१९॥ अलंकुर्वीत गोपीशमुष्णीषादिभिरुत्तमैः॥ ततो द्विजवरे दद्याद्दक्षिणां प्रेमसंयुतः॥२०॥
कुंकुमाक्ततांबूलद्वयमारात्रिकं तथा॥ नालिकेरद्वययुतं मुद्राद्वयसमन्वितं॥२१॥ गीतवा
दित्रघोषैश्च कुर्यादारात्रिकं विभोः॥ नालिकेरद्वयं मुद्राद्वयं चार्पितवेव हि॥२२॥ निवेद्य द
क्षपादाग्रे दंडवत्प्रणमेद्भुवि॥ नंदनंदन गोपीशाय श्रीदामप्राणवल्लभ नमः॥२३॥ याद्दशोऽस्ति
हरेर्लक्ष्मस्तादृशाय नमो नमः॥ एवं मुख्यार्थज्ञानकैः प्रेमविकलचेतसा॥२४॥ पुलकोन्वित
सर्वांगस्त्रिवारं प्रणमेद्विभुं। ततः समर्पयेच्छय्यां पर्यंकान्ते सुतल्पयं॥२५॥ सतिलं सगुडं मु
द्गं कल्पयेति वदन्मुकुः॥ ततश्च विधिवत्कृत्यं यथा सर्वं समाचरेत्॥२६॥ ततः श्रीलक्ष्मविश्राम २
समये वैष्णवैः सह॥ मध्याह्ने गमयेल्लक्ष्मकथाभिः स्मरणेन च॥२७॥ ततः सायाह्निके लग्नं

यथार्हर्वं विधायैवं॥ निशीथे द्युदिने चैव कुर्याज्जन्मोत्सवं विभोः॥२८॥ भगवन्निकटे स्थित्वा
ह्येकाकी प्रेमसंप्लुतः॥ यशोदानंदगोगोपीगोपादिभिरलंकृतं॥२९॥ व्रजं ध्यात्वा ततस्त
स्मिन् श्रीपुरुषोत्तमं॥ कंदर्पकोटिसौंदर्यं प्रादुर्भूतं विचिंतयेत्॥३०॥ ततो शंखमृ
दंगादितैरीत्ताद्यैः सुमंगलैः॥ स्नपनं पंचकैः कुर्यात्कुंकुमेन तथा विभोः॥३१॥ पीतांबरै
र्भूषयित्वा सुगंधैः पुष्पमाल्यकैः॥ कुंकुमागरुसारोभ्यां पटवासैस्तथैव च॥३२॥ तुल
सीमंजरीभिश्च हृजये पुरुषोत्तमं॥ ततश्चतुर्विधं भोज्यमनेकरससंयुतं॥ रोचकव्यं
जनोपेतैरसालादधिदुग्धमत्॥३३॥ विविधापूपपक्वान्नसेयावादिसमायुतं॥ समर्प
येन्महाभोगं धूपदीपादिभिस्तथा॥३४॥ अर्पयेच्च तथा स्वाहन्यच्चक्षीरकमोदकान्
।षष्ठिका हृजनं कुर्यात्ततः प्रेमपरिप्लुतः॥३५॥ ततश्चाचमनादीनि दत्वा तांबूलमर्पयेत्

प्रेंखालंकरणं कृत्वा तत्र संदोलयेद्विभुं ॥३६॥ नवनीतसिताद्राक्षाकदलीदाडिमादिकं ॥
नालिकेरं मोदकादि प्रेम्णा तत्र निवेदयेत् ॥३७॥ वादित्रैश्च बहुभिर्दंतैः काष्ठक्रीडनकैस्तथा ॥
लालयेत्स्वरयानत्वा यशोदोत्संगसंगतं ॥३८॥ हरिद्राचूर्णतैलाद्यैर्गोरसैर्विविधैस्तथा ॥
सिंचन्विलज्जो गीताद्यैर्नृत्यन्सद्वैष्णवैः ॥३९॥ एवं रात्रिविधिं कृत्वा स्नात्वा सर्वे कमान
सः ॥ भोजयित्वा सदानंदं कुर्यादारात्रिकं तथा ॥४०॥ स्वापयित्वा ततः लक्ष्मं वैष्णवान्भो
जयेद्बहून् ॥ भुंजीत तदनुज्ञातं प्रेमसंप्लुतः ॥४१॥ एवं जन्मोत्सवं कुर्याद्यो नरो गौवत्स
रः ॥ तस्य स्याद्गोपिकाधीशपादाब्जे सुदृढा रतिः ॥४२॥ अथ श्रीगोकुलाधीशप्रियाज
न्ममहोत्सवः ॥ निरूप्यते यस्मान्नेन नन्नक्तिर्भवति सुस्थिरा ॥४३॥ मासे भाद्रपदे शुक्लाष्ट ३
मी राधाष्टमीश्रुता ॥ कर्तव्योऽत्र महोत्सवस्तत्र मंगलैर्विविधैः शुभैः ॥४४॥ प्रातः सेवायथाह

वल्लिखात्तत्रऋतुवैभवः॥ सुगंधतैलकाश्मीरैः स्नपनं कारयेद्विभोः॥४५॥ काश्मीररंजिते
वस्त्रैर्महार्घमाणिक्यभूषणैः॥ गुंजाभिर्गोपिकाधीशं भूषयेत्सप्रियं प्रभुं॥४६॥ ततश्चवि
विधैर्नैवेद्यैः पक्वान्नैश्चातिकोमलैः॥ दधिदुग्धरसालाद्यैः सूपान्तैः पायसादिति॥४७
नवनीतसिताद्राक्षाकदलीदाडिमादिभिः॥ भोजयेद्गोपिकाधीशं पंजीरकमोदकैः॥४८
ततः कर्पूरकस्तूरीयुतं तांबूलमर्पयेत्॥ कुर्यादारात्रिकं मुख्यं नालिकेरद्वयान्वितं॥४९
तांबूलद्वयसंयुक्तं कुंकुमाक्षतसंयुतं॥ राधिकेशस्वरूपोऽकुर्विस्पष्टकाम्भ्रमैर्भ्रमेद्विभुं॥५०
एवं श्रीमत्स्वामिनीनां कुर्याज्जन्ममहोत्सवं॥ प्रयत्नतो यो ममेकृत्वा पुष्टि। नत्किं लभेत्तसः
५१॥ अथ श्रीवामनजयंत्युत्सवो विनिरूप्यते॥ मासि भाद्रपदे शुक्ले द्वादशी श्रवणा(
न्विता॥५२॥ उपोष्या सोत्सवांगेन धीयर्प्ध विधिनोत्सवः॥ तथैव श्रीमदाचार्यैर्निर्बंधे

विनिरूपितं॥५३॥तथाच वामनजयंत्युत्सवेत्सादिनास्फुटं।प्रातःसेवादिकं कृत्वा यथाव
द्गोकुलेश्वरं॥५४॥कुंकुमेन सुगंधेन तैलाद्यैः स्नापयेत्ततः॥पीतांबरेण मालेन मन्मेष
लान्नूपुरांगदैः॥५५॥पुष्पैश्च मुकुटेनापि भूषयेत्पुरुषोत्तमं॥पुनर्मध्याह्नसमये स्ना
पयेत्संचकैर्विभुं॥५६॥पीतांबरं परीधाय पूजयेत्कुंकुमादिभिः॥दध्योदनेन पक्वान्नेन्द
दुस्वादु समर्पयेत्॥५७॥कृत्वा चारात्रिकं विष्णोर्दंडवस्त्राणि भिक्षुवि।मेखलाजिनदंडादि
धारयन्वटुकवामनं॥५८॥नमोस्तु दिह्ि मे नक्षिं शरणागतपालक॥एवं स्तुत्वा विसृज्य
क्षांनिरंबुधरियेद्व्रतं॥५९॥एकादशी द्वादशी च श्रवणर्क्षस्पृशा यदि॥तदा तदेव कर्तव्यो
बुधसुको विष्णुशृंखले॥६०॥यदा रक्षं न लभ्येत वैष्णवं द्वादशी दिनि॥एकादशीदिने कार्य
स्तदोत्सवविधिं बुधैः॥६१॥इति संवत्सरोत्सवकल्पलतायां भाद्रपदोत्सवनिरूपणं नाम

अथमंदलं॥ निरूप्यंतेतु भक्तार्थमथाश्विनमहोत्सवाः॥ आश्विनस्यासितेपक्षेदशमीश्रव
णान्विता॥१ विजयासातिथिर्यत्रविजयार्थं रघुप्रियः॥ प्रस्थितस्तत्रकर्त्तव्योभक्तैर्ज
यमहोत्सवः॥ सासायंव्यापिनीग्राह्यासर्वलोकानुसारतः॥२॥ प्रातःसुगंधकाश्मीरि
रभ्यंगंकारयेद्विभोः॥ ततश्चकंचुकोष्णीषादिभिःशुभैर्महोत्तमैः॥३॥ अलंकुर्वीतसप्रे
ममहार्घैर्भूषणैरपिसायंकालेततःकुर्यात्तिलकंकुंकुमाक्षतैः॥४॥ तांबूलढौकितयोना
पियुक्तसारात्रिकेतथा॥ स्थापयित्वागोकुलेशस्योत्तमांगेयवांकुरान्॥५॥ रोमांचित
तनुर्भक्त्याप्रणमेद्दंडवद्भुवः॥ ततःसमर्पयेद्वाग्रेदत्वाचदशमीदकम्॥६॥ एवंयः
कुरुतेभक्त्यागोविंदेविजयोत्सवं॥ सवैश्रीगोकुलाधीशचरणेरतिमाप्नुयात्॥७॥
आश्विनस्यामलेपक्षेपौर्णिमास्यांतुवैष्णवः॥७॥ आश्विनस्यामलेपक्षेपौर्णमास्यांतु

वैष्णवः॥ तां लीलां मनसाध्यायन्कुर्याद्दासमहोत्सवं॥८॥ प्रातः सुगंधतैलेन कुंकुमेन
सुगंधिना॥ स्नापयित्वा गोपिकेशं भूषयेद्भूषणोत्तमैः॥९॥ केकिपिच्छोद्भवेनैवमु
कुटेनातिचारुणा॥ कंकणांगदकांचीभिर्विविधैर्वन्भूषणैः॥१०॥ मुक्ताहारैस्तथा गुं
जामणीनां हारविचित्रमैः॥ ततश्च तिलकं कुर्यात्स्मरेत्साध्यात्मकं॥११॥ पाटीरेण तत्त
कुर्यात्तन्मध्ये मृगनाभिजं॥ बिंदुं ततश्च तन्मध्ये मौक्तिकं बिंदुमेव च॥१२॥ ततो मक
रिकापत्रं कृत्वा लक्ष्म कपोलयोः॥ पीतांशुकैर्भूषयित्वा स्मरेद्रुक्मकदंबकं॥१३॥ ततश्च
विविधैर्भोज्यैर्यथारूपिकागतिं॥ मंगलैर्गीतवाद्याद्यैः स्तोत्रैः संतोषयेत्प्रभुं॥१४॥ कृत्वा ५
चारात्रिकं प्रेम्णा प्रणमेत्कुलाधिपं॥ एवं सेवेत यो भक्त्या स लभ्यास्य मनवाञ्छया तु१५ ०
इति श्रीसंवत्सरोत्सवकल्पलतायामाश्विनोत्सवनिरूपणं नाम द्वितीयं दलं॥ ॥

निरूप्यंतेऽथ मंतव्यानां तुष्टये कार्त्तिकोत्सवाः॥ कार्त्तिकस्यासितपक्षे च चतुर्दश्यां विधूदये
सीतालोष्टसमायुक्तं सकंटकदलान्वितं॥ अपामार्गं भ्रामयित्वा ततो दीपपुरःसरं॥ कु
र्यात्सुशोभनं भालेतिलकं कुंकुमाक्षतैः॥२॥ समर्पयेत्तथा चाग्रे मंतव्या तांबूलकद्वयं
ततश्चाभ्यंगविधिना स्नापयेत्कुलात्विषं॥३॥ नवीनैः श्वेतवस्त्रैश्च भूषयेत्सुरुषोत्त
मो बुधैः॥ दीपोत्सवः कार्यः सायं व्यापिनि पर्वणि॥४॥ शिरस्यभ्यंगविधिना स्नापयेत्
कुलेश्वरं॥ ततश्चानुत्तमैः शुभ्रैः कंचुकोष्णीषवादिभिः॥५॥ विविधैर्भूषणैश्चापि भूष
येद्ब्रजनायकं॥ ततो निवेदयेत्कुल्यं महत्पश्चाद्दीपकान्॥६॥ सायंकाले ततः कुर्याद्दि
ततैलसुपूरितैः दीपकैश्चोज्ज्वलां रात्रिं गीतैर्वाद्यैर्मनोरमैः॥७॥ ततश्च दाडिमद्रा
क्षाकदलीक्षुरसोद्भवैः॥ रसैर्विकारैर्विविधैस्तांबूलैश्च सुशोभनैः॥८॥ सुगंधागरुक

पूरकस्तूरीलेपनादिभिः॥माल्यैः सुगंधपुष्पाणां यथाभागं प्रमंडयेत्॥९॥ततश्चारात्रिकं कृ
त्वा स्वापयेत्पुरुषोत्तमं॥द्वितीयेन्हि ततः कुर्यादन्नकूटमहोत्सवं॥१०॥स्नापयित्वा विभुं
प्रातर्भूषयेद्भूषणोत्तमैः॥वस्त्रैश्च सकंचुकोष्णीषैस्तथा पीतांशुकैरपि॥११॥ततश्च निजव
त्सेभ्यं पूजयेद्भोजनादिभिः॥ततो गोवर्द्धनगिरिं स्नापयेत्पयसा गवां॥१२॥पुनः शीतजलैः
शुद्धैः सुगंधैश्चंदनादिभिः॥ततश्च तुलसीपुष्पहरिद्राकुंकुमाक्षतैः॥१३॥हरिद्रारंजितैर्व
स्त्रैर्धूपदीपादिभिस्तथा॥स्वादुभिर्विविधैश्चान्नैर्लड्डुभिर्मोदकादिभिः॥१४॥तां चूल्या रात्रि
कैः श्चापि पूजयेन्मंगलैः स्वनैः॥अस्मत्र गोमये नैव कुर्याद्गोवर्द्धनं गिरिं॥१५॥ततश्च पूज ६
येद्विप्रान् गोपालांश्च विशेषतः॥वस्त्रमाल्यसुपक्वान्नकुंकुमाक्षतचंदनैः॥१६॥पूजयि
त्वा च गोवत्सान् कुर्याद्गोक्रीडनं तथा॥ततश्चापूपसंयावशष्कुलीमोदकादिभिः॥१७

विविधैर्व्यंजनैश्चापि सूपांतैः पायसादिभिः॥ दधिदुग्धैर्बहुविधैर्वटिकैः पर्पटैस्तथा॥१८
न्नदनैश्च तथा कूटैः कृत्वा गोवर्द्धनोपमं॥ द्रुपदीपादिकं कृत्वा प्रोक्ष्यच्छंखोदकैरपि॥१९
कृत्वान्नकूटे तुलसीपत्रेण लक्षं निवेदयेत्॥ श्रीविठ्ठलप्राणनाथं गोत्रनाथं हृदि स्मरे
त्॥ गीतैः सुमंगलैर्भोग समये तोषयेत्प्रभुं॥२०॥ ततश्चाचमनं दत्वा तांबूलं विनि
वेदयेत्॥ कृत्वाचारात्रिकं प्रेम्णा दंडवत्प्रणमेत्प्रभुं॥२१॥ ततः सुमंगलैर्गीतैश्चा
न्नकूटं परिक्रमेत्॥ य एवमुत्सवं कुर्यात्तस्य कृष्णः प्रसीदति॥२२॥ कार्तिकस्यासिते
पक्षे द्वितीयायां च वैष्णवः॥ प्रातरभ्यंगविधिना स्नापयेद्गोकुलेश्वरं॥२३॥ श्वेतोष्णी
षं मस्तके कंचुकं भूषणं॥ भूषयित्वा सतिलं कुर्यान्नीराजनं विभो॥२४॥ दध्योद
नं दत्वा श्रीरामोदकामर्पयेत्ततः॥ एवं दीपोत्सवदिनत्रयं कार्यं हि वैष्णवैः॥२५॥

कार्त्तिकस्यसितेपक्षे एकादश्यांमहोत्सवः॥ विधिवद्वैष्णवैर्भक्त्या कार्यश्चोत्थापना
त्मकः॥२१॥ प्रातरभ्यंगविधिना स्नापयित्वा व्रजाधिपं॥ नवैःसितोष्णीषवस्त्रैःकंचु
कादिभिरुत्तमैः॥२२॥ अनुत्तमैर्भूषणैश्च भूषयेद्भक्तिमान्नरः॥ ततश्चरात्रिसम
येकुर्यादुत्थापनोत्सवं॥२३॥ शंखघंटामृदंगादिवाद्यैर्गीतैःसुशोभनैः॥ हरिद्राकुंकु
माद्यैश्चमंगलैश्चित्रयेद्भुवं॥२४॥ उत्सेहुंमडपंतत्रन्यसेत्सिंहासनोत्तमं॥ मंडप
स्यचतुर्दिक्षुकुर्याद्दीपान्घृतान्वितान्॥२५॥ दक्षिणाभिमुखंकृष्णंभक्त्यासंस्था
पयेत्ततः॥ उत्तिष्ठोत्तिष्ठगोविंदत्यजनिद्रांजगत्पते॥ त्वयिसुप्तेजगत्सुप्तमुत्थिते ७
त्तिष्ठितंजगत्॥२६॥ एनंमंत्रंत्रिरुच्चार्यत्रिवारंगोपिकेश्वरं॥ ससिंहासनमुत्थाप्यप्रा
ङ्गनैःसंस्थापयेत्पुनः॥२७॥ ततश्चपंचकैःकृष्णमभ्यंगविधिनातथा॥ स्नापयि

त्वाहृज्जये चूडपुष्पमालाश्चैसुगंधिभिः ॥ ७३ ॥ पीतांबरं परीधाप्य तथा सत्तूलिकादिकं तत
श्च स्थापयेद्देवेद्दृसन्नीचाम्निसंन्नतां ॥ ७४ ॥ धूपदीपादिकं दत्त्वा नैवेद्यं कल्पयेन्मुदुः ॥
अर्पयेच्च नवीनेक्षुकंदमूलफलादिकं ॥ ७५ ॥ ततश्चाचमनं दत्त्वा तांबूलादि निवेदयेत्
निराजयेच्च प्रणमेत्प्रदक्षिणपुरःसरं ॥ ७६ ॥ ततश्च जागरं कुर्याद्गुणगानादिभिर्हरेः ॥ द
धिरोचकपक्वान्नान्कृत्वा पात्रचतुष्टयं ॥ ७७ ॥ धूपदीपैः पात्रमेकं प्रतियामं समर्पयेत्
प्रतिभोगावसानं च कुर्यादारात्रिकं तथा ॥ ७८ ॥ लड्डादिकं यदा रात्रौ स्यात्तदोत्थापयेद्दि
वा ॥ य एवं भक्तिमान्कुर्यात्तस्मस्योत्थापनोत्सवं ॥ ७९ ॥ लभेत स दृढां भक्तिं हरेः प्रेमात्मि
कां सदैव ॥ इति श्रीसंवत्सरोत्सवकल्पलतायां कार्त्तिकोत्सवनिरूपणं नाम तृतीयं दलं
श्री ॥ ॥ अथ मार्गशिरमासि प्रमेयफलबोधके ॥ प्रमेयरससिद्ध्यर्थं हृज्जये

डोकुलाधिपं॥१॥पटांबरैस्तु विविधैर्मृदुनिस्थूलकंचुकैः॥भूषयेद्भूषणैर्दिव्यैस्तथा मृगम(
दादिभिः॥२॥मद्दरैर्दधिदुग्धेस्तु रसपिष्टं विनिर्मितैः॥रसैरसपैसंयावन्नाक्कुलीमोदकादि
निः॥३॥विविधैर्व्यंजनैश्चापिनपाचारादिरम्बकैः॥भोज्यैर्बहुविधैश्चान्यैर्भोजयेदन्नदं वि
सुः॥४॥एवं मार्गशिरो कुर्यात्सिजांप्रेमाद्वयेप्रतोः॥५॥स्तमात्मप्रदोदद्यात्स्वभक्तिनंदनं
दनं॥५॥ इतिश्रीसंवत्सरोत्सवकल्पलतायांमार्गशिरोत्सवनिरूपणंनामचतुर्थदलं
निरूप्यते॥अथपौषमासस्यमहोत्सवविधिंविनो॥महोत्सवस्वरूपंचभक्तानांभक्तिबुद्धये
॥पौषमासस्याद्यपक्षेनवम्यांपुरुषोत्तमः॥श्रीविठ्ठलेशरूपेणप्रादुरासीत्कृपानिधिः॥२॥
भक्तिमार्गप्रवृत्त्यर्थंदैवोद्धारप्रपात्तवान्॥विठ्ठलोजन्माष्टमीस्वस्कामासाद्वैरलएवहि॥३॥
समीधाकृत्यैवनिर्णीतंनवमीव्रतं॥ततस्त्वक्तिसिध्यर्थंकार्यस्तैत्रोत्सवोबुधैः॥४॥

शंखदुंदुभिनिर्घोषैर्गीतैर्वाद्यैःसुमंगलैः॥मंडपेन्मंदिरे वस्त्रैस्तोरणैःकदलीदलैः॥५॥स्रग्
फलैर्नालिकेरैःपताकैर्विविधैस्तथा॥प्रातरुत्थायचततस्त्वभ्यंगविधिनाविभुं॥६॥स्नापयि
त्वाततःश्लक्ष्णंरूक्षयेद्रूक्षणोत्तमैः॥कंचुकेनचपीतेनह्यौमेनात्यसत्कृतेनच॥७॥तल्लकं
बुकमुखेनपीतोष्णीषोत्तमेनवा॥नवकाश्मीररक्तेनप्रावारेणामलेनवा॥८॥काश्मीरा
गरुसारादिमालैश्चपटवासकैः॥सुगंधैर्विविधैश्चान्यैःप्रेम्णाल्लक्ष्मं समर्पयेत्॥९॥
ततश्च णकगोधूमपिष्टेक्षुरसकाम्सितान्॥मोदकादीन्शिखरिणीघनंदध्यमृतोप
मं॥१०॥ससितंवश्शृतंक्षीरंनवमृत्स्नाज्जनक्षितौ॥ नवनीतंवसासितंकदलीद्राक्षादि
मान्॥११॥ तथाविविधान्पाकान्नमतान्पायसादिकान्॥ समर्पयेद्भक्तियुक्तःश्रीलक्ष्मी
विश्वेश्वरे॥१२॥तांबूलाद्युपचारांश्चदत्वाचमनमर्पयेत्॥ततश्चारात्रिकंकृत्वामस्तके

संप्रणमेत्स्रग्मु॥१७॥एवंसप्रेमयः कुर्यात्श्रीविठ्ठलमहोत्सवांतस्यश्रीगोकुलाधीशाः श्रि
यंसंप्रविशंतुहृदि॥१८॥ ॥इतिश्रीसंवत्सरोत्सवकल्पलतायांपौषोत्सवनिरूपणंनाम
पंचमदलं॥माघमासोत्सवविधिर्लिख्यते यथाविवेकतः॥माघेशुक्लपंचम्यांस्यादुदयव्या
पिनीयदि॥१॥तदोत्सवोवसंतारव्यः कार्योगीतादिनिर्महान्॥शुभ्रमभ्यंगविधिनास्ना(
पयित्वाचलन्दृप्रये॥२॥सितैस्तुकंचुकोष्णीषकटिबंधादिभिर्नवैः॥सुगंपुष्पचूतादिमं(
जरीपल्लवादिभिः॥३॥विविधैःपटवासैश्चकुंकुमागरुसारकैः॥कोटिकंदर्पसौभाग्य
मर्चयेद्गोकुलाधिपं॥४॥ततश्चस्वादुपक्वान्नपयःशक्तिनिवेदयेत्॥तांबूलमर्पयित्वा २
चकृत्वाह्याराात्रिकंनमेत्॥५॥ततश्चारभ्यकाश्मीरपटवासादिभिर्विभुं॥सुवाद्यैर्नृत्यगी
ताद्यैरादोलोत्सवसमर्चयेत्॥६॥इतिश्रीसंवत्सरोत्सवकल्पलतायांमाघोत्सवनि

निरूपणंनामषष्ठंदलं॥ ॥अथोत्सवनिरूपणं॥ तेमासिफाल्गुनसंज्ञके॥ फाल्गुनस्यासितेप
क्षेश्रीमद्गोवर्द्धनाधिपः॥१॥ व्याजंलौकिकमाश्रित्यश्रीविठ्ठलगृहेगमत्॥ प्रेमातिशयबोधार्थं
प्रेमातिशयवत्सलः॥२॥ तदागमनसंजातःश्रीविठ्ठलगोकुलेतदा॥ उत्सवस्तुमहानासी
त्सन्नक्यास्त्विवर्णनि॥३॥ तदीयैस्तुतदास्यर्थंकर्तव्यश्चोत्सवोमहान्॥ वस्त्रालंकारभूषा
दिभोजनैर्विविधैरपि॥४॥ सुगंधपुष्पतांबुलारात्रिकादिभिरुत्तमैः॥ रोमांचिततनुर्भूत्वा
प्रणमेद्व्रजाधिपं॥५॥ फाल्गुन्यांपौर्णमास्यान्तुस्नापयेद्व्रजनायकं॥ अभ्यंगविधिनाहृस्यान
पयेत्प्रेमहर्षितः॥६॥ पुनर्होलोत्सवंकुर्यादुत्तराफाल्गुनीदिने॥ तथास्कंदेहोत्सवसर्वडेन
पंप्रस्तुतवान्हरि॥७॥ तथाचफाल्गुन्यांक्रीडनंकुर्याद्दोलायामनन्तमिपेति॥ सर्वेदोलां(
समारोप्यमंडपेतत्पल्लवादिभिः॥८॥ नैवेद्यधूपदीपाद्यैर्दोलांसंपूजयेत्ततः॥ पीतांबुक

सीतोष्णीषकंचुकादिविभूषितं ॥९॥ दोलामारोपयेच्च तल्लक्ष्मं शंखदुंदुभिनिस्वनैः ॥ काश्मीरपं
काप्रारुसद्रसादिपटवासकान् ॥१०॥ स्थापयित्वाग्रतो कुर्यात्तिलस्तद निमंत्रणं ॥ ततस्तैस्तज्जये
त्कुष्ठमाल्यैश्चापि सुगंधभिः ॥११॥ ततो विविधपक्वान्नं दध्यादि विनिवेदयेत् ॥ तांबूलमर्पयि
त्वा च कुर्याद्रात्रिकं ततः ॥१२॥ कृत्वाश्चोत्तमै गीतैरेवं दोलोत्सवास्त्रिधा ॥ ततः प्रदक्षिणं
चाग्रे प्रणामे दंडवद्भिर्नुः ॥१३॥ ततो गोपिकाः मुक्तार्यदोलमुपासयेत्तथा ॥ भक्तिप्राप्तिद्धुभिः ।
कार्यश्चैवं दोलमहोत्सवः ॥१४॥ इति श्री संवत्सरोत्सवकल्पलतायां फाल्गुनोत्सवनिरूपणं
नामसप्तमं दलं ॥ ॥ अथ चैत्रोत्सवविविधिर्निरूप्यते चैत्रे मासि तु शुक्लायां नवम्यां १०
रघुनायकः ॥१॥ प्रादुरासीत्ततकार्यो विष्णवैरूत्सवो महान् । तदंगत्वाद्व्रतस्यापि सोपो
ष्यासर्वथा बुधैः ॥२॥ नोपोष्या चाष्टमीविद्धा प्रातःस्याद्दशमी यपि ॥ तदभावे तु सर्वैवपारणं

दिविधानतः॥३॥अगस्त्यसंहितायांचवचनानितथैवहि॥लभ्यंतेतानिलिख्यंतेप्रमाण(
त्वेनचात्रवै॥४॥तथाच॥चैत्रेमासिनवम्यांतुजातोरामःस्वयंहरिः॥पुनर्वस्वृक्षसंयुक्ता
सातिथिसर्वकामदा॥१॥सैवमध्यान्हयोगेनमहापुण्यतमाभवेत्॥मेषंपूषणिसंप्राप्तेल
ग्नेकर्कटकाह्वये॥२॥आविरासीत्सकलयाकौशल्यायांपरःपुमान्॥नवमीचाष्टमीवि
द्धात्याज्याविष्णुपरायणैः॥३॥उपोषणंनवम्यांवैदशम्यामेवपारणं॥दशम्यांपारणा
यांश्चनिश्चयान्नवमीव्रतये॥४॥विद्धापिनवमीग्राह्यावैष्णवैरप्यसंशयमिति॥तत्रप्रातः
समुत्थायस्नापयेत्पंचकैर्विभुं॥५॥ततश्चाप्यंगविधिनाभूषयेच्चतथोत्तमैः॥महार्घै
र्भूषणैर्दिव्यैः वस्त्रैःकुंकुमरंजितैः॥६॥ततोमध्यान्हसमयेशंखदुंदुभिनिस्वनैः॥विविधै
गीतवाद्यैश्चस्नापयेत्पंचकैःपुनः॥७॥पीतांबरेणकाश्मीरमाल्याद्यैःपूजयेत्ततः॥ततश्च

भूषणैर्दिव्यैर्विविधैर्नोऽस्यंपक्वान्नादिनिवेदयेत्॥२॥ तांबूलमर्पयित्वाचकुर्यादारात्रिकंत
तः॥प्रणमेद्दंडवत्कृष्णंयदीछेद्भक्तिमुत्तमां॥२॥ इतिश्रीसंवत्सरोत्सवकल्पलतायांचैत्रोत्स
वनिरूपणंनामअष्टमंदलं॥८॥ निरूप्यंतेऽथभक्तानांतुष्टयेमाधवोत्सवः॥एकादश्यांमाघ
पक्षेमाधवेणकुलाधिपा॥१॥ आविर्भाविता वान्स्वास्यंपुष्टिमार्गप्रवृत्तये॥पुष्टिमार्गप्रवर्त्तै
स्तुभक्तैस्तद्भक्तिसिद्धये॥२॥ महोत्सवस्तत्रकार्योविविधैर्मंगलादिभिः॥प्रातरभ्यंगविधि
नास्नापयेद्व्रजवल्लभं॥३॥ काश्मीररंजितैर्वस्त्रैर्भूषणैश्चमहाधनैः॥भूषयित्वाचका
श्मीरपुष्पाद्यैश्चार्चयेद्विभुं॥४॥ ततोदुग्धादिभिर्नोऽस्यैविविधैर्भोजयेत्प्रभुं॥ तांबूलमर्प ११
यित्वाचभेरीदुंदुभितिःस्वनैः॥५॥ विविधैर्गीतवाद्याद्यैःकुर्यादारात्रिकंप्रभोः॥दंडवत्प्रण
मेत्प्रेम्णा॥ इमंश्रीवल्लभनाम्नकं॥६॥ एवंकृत्वोत्सवंतत्वात्पुष्टिभक्तिमवाप्नुयात्॥श्लो

पक्षेतुवैशाखेतृतीयाक्षयसंज्ञिता॥७॥भक्तैस्तत्रकर्तव्योविधिनाचंदनोत्सव॥कार्योहि
विधिनातत्रप्रातरभ्यंगकंहरे॥८॥कारयित्वाततःश्वेतप्रावारपरिधानकं॥भूषये
द्वतथावस्त्रैश्चित्रैर्मुक्ताविभूषणैः॥९॥कुंकुमागरुकर्पूरकस्तूरीभिःसुघर्षितं॥चंद
नंस्थापयेत्पात्रेविधिनाचाभिमंत्रयेत्॥१०॥चंदनेनार्चयेत्कृष्णपदाद्यवयवान्हरेः॥
शीतलैःपुष्पमालैश्चवीजयेद्व्यजनैस्तथा॥११॥तथाचोक्तं-स्कंदेउक्तप्रोक्तवान्नृपति
हरिः॥तथाच॥वैशाखस्यासितेपक्षेतृतीयाक्षयसंज्ञिता॥तत्रमांलेपयेद्गंधलेपनैरपि
शोभनमित्यादि॥१२॥दध्योदनंमानकंचनवमृद्भाजनस्थितं॥तांबूलमर्पयेत्कृष्णकुर्या
दारात्रिकंतथा॥१३॥प्रणमेद्दंडवत्कृष्णंयःकुर्यादिदमुत्सवं॥प्रयत्नोलभतेपुष्टिंभक्ति
सपरमोत्तमां॥१४॥वैशाखस्यसितेपक्षेश्रीनृसिंहचतुर्दशी॥जयंतीसापापहराका

कार्येतस्मिन्व्रतोत्सवो ॥१५॥ सर्वविद्धाडसान्तकैर्नैवोपोष्या कथंचन मुनिनिर्व
चनं प्रोक्तं वैष्णवो देश्यातस्तस्मा ॥१६॥ वैष्णवैस्तु न कर्तव्या स्मरविद्धा चतुर्दशी ॥ प्रातर
भ्यंगविधिना स्नापयित्वा तथोत्तमैः ॥१७॥ कास्तूरीरंजितैर्वस्त्रैर्भूषयेत्पुरुषोत्तमं ॥
ततश्च नित्यवत्कुर्याद्दिवा सायं सेवनं हरे ॥१८॥ सायंकाले ततः कुर्यात्स्नपनं पंचकैर्वि
भो ॥ पीतांबरेण मालाभिश्चंदनेनार्चयेत्प्रभुं ॥१९॥ दध्योदनं पानकं च कर्कराकरा
दिकं ॥ समर्पयित्वा तांबुलं चार्पयेत्प्रेमसंयुतः ॥२०॥ ततश्चारात्रिकं कुर्याद्गीतवादित्र
मंगलैः ॥ यादृशो सोऽतिपद्येन प्रणमेत्पुरुषोत्तमं ॥२१॥ सर्वं कृत्वा श्रीनृसिंहजयंती व्रत १२
मुत्तमं ॥ परमं भक्तिमाप्नोति मुच्यते चातिपातकैः ॥२२॥ ॥ इति श्री संवत्सरोत्सवकल्प
लतायां वैशाखोत्सवनिरूपणं नाम नवमं दलं ॥२३॥ उत्सवोऽथ ज्येष्ठमासस्य वि

विधिनायनिरूप्यंते। ज्येष्टमासिसितेपक्षे रुद्रदैवेचंद्रदैवते॥ पौर्णमास्यांसदानंद्यासंस्ना
पयेत्सुमं॥१॥ ब्रह्मणा च तथाप्रोक्तं संदष्ठेन मुनीश्वरैः॥ ज्येष्ठी प्रशंसका ध्यौये पुराणे ब्रह्म
संज्ञके॥२॥ तथ्य च मासे ज्येष्टे च संप्राप्ते नक्षत्रे चैंद्रदैवते॥ पौर्णिमास्यां तदा स्नानं सर्व
कालहरिर्द्विजा॥३॥ प्रथमेह्नि च सायाह्ने जलमानीय भक्तितः॥ स्थापयेत्कलशे शुचे
मध्ये पुष्पाणि निक्षिपेत्॥४॥ चंदनं तुलसीपत्रं क्षिप्त्वा वार्यभिमंत्रयेत्॥ ततश्च प्रात
रुत्थाय स्नापयेत्कुलाधिपं॥५॥ स्वर्णधर्ममिति श्रुत्वा तथा पुरुषसूक्ततः॥ घंटाशंख
मृदंगाद्यैर्विविधैर्मंगलैस्वनैः॥६॥ ततश्च विविधैः शुचैर्वस्त्रैः लक्ष्मं विलेपयेत् प्रियाश्च
मोदकैः सुडैः पानकैर्नोत्तमैन्नच॥७॥ भोजयेद्गोपिकाधीशं तांबूलादि तथार्पयेत्॥ एवं
यः पूजयेद्भक्त्या तस्य लक्ष्मी प्रसीदति॥८॥ इति श्रीसंवत्सरोत्सवकल्पलतायां ज्येष्ठ

सवनिरूपणं नाम दशमं दलं ॥ ।महोत्सवोऽथाषाढस्य विस्तरेण निरूप्यते ॥ आषाढस्य
कृष्णपक्षे तु पुष्या यदि भवेत्तदा ॥ कार्यो रथो भवत्प्रेम्णा श्रीजगन्नाथप्रीतये बुधैः ॥१॥ तथा चो
क्तं जगन्नाथप्राणोदिरुद्रान्नृपति ॥ स्कान्दसोत्कलखंडस्य ऽध्याये चैकोनत्रिंशके ॥२॥ त
था च ॥ आषाढस्यासिते पक्षे द्वितीया पुष्यसंयुता ॥ तस्यां रथे समारोप्य रामं च भद्रया
सहेति ॥३॥ प्रातरभ्यंगविधिना स्नापयित्वा व्रजेश्वरं ॥ सितैः सुकुंकुमैः षप्राच्यारक्त
विविधनैः ॥४॥ महाघरिन्नीलेंद्रमणिवज्रादिभूषितैः ॥ भूषणैर्भूषयेत्कृत्वा रथम
ध्याश्वभूषयेत् ॥५॥ विविधैर्भूषणैर्वस्त्रैः संहृष्टा वाद्ययेत्ततः ॥ स्थापयित्वा च विधि ९३
वद्गृह्णीगतिसुखं रयं ॥६॥ संस्थापयेद्रथे लक्ष्मीं शंखवाद्यैर्मंगलस्वनैः ॥ ततो विविधप
क्वान्नं कर्कटीबीजमोदकान् ॥७॥ मुद्गांकुरांस्तथा चाम्रान् पनसं च सितान्वितं ॥ कर्क

टीकदलीश्च त्ताफलान्युत्तमानि च॥८॥ त्रिधा समर्प्य सर्वं तांबूलं च त्रिधार्पयेत्॥ दत्वा वा
रात्रिकं नत्वा रथं सच्छं प्रणमेद्द्विज॥९॥ त्रिः परिक्रम्य गोपीनाथं रथमुत्वासयेत्ततः॥ एवं यः
कुजयेत्कल्पं सर्वलक्ष्मीमवाप्नुयात्॥ १०॥ इति श्रीसंवत्सरोत्सवकल्पलतायां माघादो
त्सवनिरूपणं नामैकादशं दलं॥ ॥ अथ श्रावणमासस्य निरूप्यंते महोत्सवाः
॥१॥ श्रावणे विमले पक्षे एकादश्यां तु वैष्णवः॥ पवित्रारोपणं कुर्यात्कृष्णमावर्ज्य नन्दितः॥
क्षौमैः कार्पासिसूत्रैर्वा पवित्रं विधिवन्नरः॥ सत्वा संस्थापयेत्पात्रे विधिना चाह्वयेत्ततः॥
प्रमां चित्त तत्तुमूत्वा श्रीकृष्णे विनिवेदयेत्॥ नमस्कृत्य यथाशक्ति सितादि विनि
वेदयेत्॥ एवं यः प्रयतो नित्यं पवित्रोत्सवमाचरेत्॥ गोकुलाधिपपादाब्ज
रतिस्त्वदृढा भवेत्॥४॥ न कुर्याद्यो नरो मोहात्पवित्रारोपणं हरौ॥ तस्य संवत्सरं तु

ताद्रुजा निःफलतामियात्॥५॥ श्रावण्यां पौर्णमास्यां तु भद्रामुक्ते च वैष्णवः॥ भक्त्या श्रीगो
कुलाधीशे रक्षाबंधनमाचरेत्॥६॥ विविधैः पदसूत्रैस्तु कृत्वा रक्षामनुत्तमां॥ स्था
पयित्वोत्तमे पात्रे कुंकुमाक्षतिकादिकं॥७॥ कृत्वा च तिलकं बधारक्षां श्रीकरयोः॥
शुभां॥ अर्पयित्वा च तांबुलद्वयनीराजयेत्ततः॥८॥ समर्पयेत्ततो भक्त्या महत्स्वदन्ना
मोदकान्॥ तांबुलाद्यर्पयित्वा च प्रणामे दंडवत्सतु॥९॥ गोकुलाधीशपादाब्जपरागा
सक्तचेतसां॥ भक्तानां तुष्टये प्रोक्तः संवत्सरमहोत्सवः॥१०॥ संवत्सरोत्सवानुज्ञा
त्वा तत्सेवा समाचरेत्॥ यो भक्त्या सकलमेज्ञं वं गोकुलाधीशपादयोः॥११॥ स्वम्वा २८
र्थ चरणांभोजरेणुदास्यार्थिनां कृता॥ संवत्सरोत्सवद्यैः स्तुतिः कल्पलता मया॥१२
तेन चाचार्यप्रसीदंतु दानेनिःसाधनेमयि॥ ज्ञात्वा ज्ञात्वापि यच्चात्र जीवबुध्यानिरू

पितं॥१३॥ह्रभंचाचार्यचरणास्तत्स्वीयेषुदयालवः॥गोवर्द्धनोधीशपादाप
द्मद्वयस्यार्थिनः॥सदादेवकीनंदनस्येयंकृतिर्विजयतेतरां॥१४॥ ॥
इतिश्रीसंवत्सरोत्सवकल्पलतायांश्रावणोत्सवनिरूपणंनामद्वादशमं
दलंसंपूर्णं संपूर्णाचेयंसंवत्सरोत्सवकल्पलता॥ श्री श्री